मार्कण्डेयपुराणम्/अध्यायः ०११-०१५



Exported from Wikisource on २३ जनवरीमासः २०२४

[मार्कण्डेयपुराणम्]

एकादशोऽध्यायः

पुत्र उवाच

निषेकं मानवं स्त्रीणां बीजं प्राप्तं रजस्यथ ।
विमुक्तमात्रो नरकात् स्वर्गाद्वापि प्रपद्यते ॥११.१ ॥

तेनाभिभूतं तत् स्थैर्यं याति बीजद्वयं पितः ।
कललत्वं बुद्बुदत्वं ततः पेषित्वमेव च ॥११.२ ॥

पेष्यां यथाणुबीजं स्यादङ्कुरस्तद्वदुच्यते ।
अङ्गानां च तथोत्पत्तिः पञ्चानामनुभागशः ॥११.३ ॥

उपाङ्गान्यङ्गुली-नेत्र-नासास्य-श्रवणानि च ।
प्ररोहं यान्ति चाङ्गेभ्यस्तद्वत् तेभ्यो नखादिकम् ॥११.४ ॥

त्वचि रोमाणि जायन्ते केशाश्चैव ततः परम् ।
समं समृद्धिमायाति तेनैवोद्भवकोषकम् ॥११.५ ॥

नारिकेलफलं यद्वत् सकोषं वृद्धिमृच्छति ।
तद्वत् प्रयात्यसौ वृद्धिं सकोषोऽधोमुखः स्थितः ॥११.६ ॥

तले तु जानु-पार्श्वाभ्यां करौ न्यस्य स वर्धते ।
अङ्गुष्ठौ चोपरि न्यस्तौ जान्वोरग्रे तथाङ्गुली ॥११.७ ॥

जानुपृष्ठे तथा नेत्रे जानुमध्ये च नासिका ।
स्फिचौ पार्ष्णिद्वयस्थे च बाहुजङ्घे बहिः स्थिते ॥११.८ ॥

एवं वृद्धिं क्रमाद्याति जन्तुः स्त्रीगर्भसंस्थितः ।
अन्यसत्त्वोदरे जन्तोर्यथा रूपं तथा स्थितिः ॥११.९ ॥

काठिन्यमग्निना याति भुक्तपीतेन जीवति ।
पुण्यापुण्याश्रयमयी स्थितिर्जन्तोस्तथोदरे ॥११.१० ॥

नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते ।
स्त्रीणां तथान्त्रसुषिरे सा निबद्धोपजायते ॥११.११ ॥

क्रामन्ति भुक्तपीतानि स्त्रीणां गर्भोदरे यथा ।
तैराप्यायितदेहोऽसौ जन्तुर्वृद्धिमुपैति वै ॥११.१२ ॥

स्मृतीस्तस्य प्रयान्त्यस्य बह्व्यः संसारभूमयः ।
ततो निर्वेदमायाति पीड्यमान इतस्ततः ॥११.१३ ॥

पुनर्नैवं करिष्यामि मुक्तमात्र इहोदरात् ।
तथा तथा यतिष्यामि गर्भं नाप्स्याम्यहं यथा ॥११.१४ ॥

इति चिन्तयते स्मृत्वा जन्मदुःखशतानि वै ।
यानि पूर्वानुभूतानि दैवभूतानि यानि वै ॥११.१५ ॥

ततः कालक्रमाज्जन्तुः परिवर्तत्यधोमुखः ।
नवमे दशमे वापि मासि सज्जयते यतः ॥११.१६ ॥

निष्क्रम्यमाणो वातेन प्राजापत्येन पीड्यते ।
निष्क्राम्यते च विलपन् हृदि दुःखनिपीडितः ॥११.१७ ॥

निष्क्रान्तश्चोदरान्मूर्च्छामसह्यां प्रतिपद्यते ।
प्राप्नोति चेतनां चासौ वायुस्पर्शसमन्वितः ॥११.१८ ॥

ततस्तं वैष्णवी माया समास्कन्दति मोहिनी ।
तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुते ॥११.१९ ॥

भ्रष्टज्ञानो बालभावं ततो जन्तुः प्रपद्यते ।
ततः कौमारकावस्थां यौवनं वृद्धतामपि ॥११.२० ॥

पुनश्च मरणं तद्वज्जन्म चाप्नोति मानवः ।
ततः संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत् ॥११.२१ ॥

कदाचित् स्वर्गमाप्नोति कदाचिन्निरयं नरः ।
नरकं चैव स्वर्गं च कदाचिच्च मृतोऽश्नुते ॥११.२२ ॥

कदाचिदत्रैव पुनर्जातः स्वं कर्म सोऽश्नुते ।
कदाचिद्भुक्तकर्मा च मृतः स्वल्पेन गच्छति ॥११.२३ ॥

कदाचिदल्पैश्च ततो जायतेऽत्र शुभाशुभैः ।
स्वर्लोके नरके चैव भुक्तप्रायो द्विजोत्तम ॥११.२४ ॥

नरकेषु महद्दुःखमेतद् यत् स्वर्गवासिनः ।
दृश्यन्ते तात मोदन्ते पात्यमानाश्च नारकाः ॥११.२५ ॥

स्वर्गेऽपि दुःखमतुलं यदारोहणकालतः ।
प्रभृत्यहं पतिष्यामीत्येतन्मनसि वर्तते ॥११.२६ ॥

नारकांश्चैव संप्रेक्षय महद्दुःखमवाप्यते ।
एतां गतिमहं गन्तेत्यहर्निशमनिर्वृतः ॥११.२७ ॥

गर्भवासे महद्दुःखं जायमानस्य योनितः ।
जातस्य बलाभावे च वृद्धत्वे दुःखमेव च ॥११.२८ ॥

कामेर्ष्या-क्रोधसम्बन्धं यौवने चातिदुः सहम् ।
दुः खप्राया वृद्धता च मरणे दुः खमुत्तमम् ॥११.२९ ॥

कृष्णमाणस्य याम्यैश्च नरकेषु च पात्यतः ।
पुनश्च गर्भो जन्माथ मरणं नरकस्तथा ॥११.३० ॥

एवं संसारचक्रेऽस्मिन् जन्तवो घटियन्त्रवत् ।
भ्राम्यन्ते प्राकृतैर्बन्धैर्बद्धा बाध्यन्ति चासकृत् ॥११.३१ ॥

नास्ति तात ! सुखं किञ्चिदत्र दुः खशताकुले ।
तस्मान्मोक्षाय यतता कथं सेव्या मया त्रयी ॥११.३२ ॥

इति श्रीमार्कण्डेयपुराणेठपित्रापुत्रसंवादो ऽ नाम
एकादशोऽध्यायः

द्वादशोऽध्यायः

पितोवाच

साधु वत्स ! त्वयाख्यातं संसारगहनं परम् ।
ज्ञानप्रदानसम्भूतं समाश्रित्य महाफलम् ॥१२.१ ॥

तत्र ते नरकाः सर्वे यथा वै रौरवस्तथा ।
वर्णितास्तान् समाचक्ष्व विस्तरेण महामते ॥१२.२ ॥

पुत्र उवाच

रौरवस्ते समाख्यातः प्रथमं नरको मया ।
महारौरवसंज्ञं तु शृणुष्व नरकं पितः ॥१२.३ ॥

योजनानां सहस्राणि सप्त पञ्च समन्ततः ।
तत्र ताम्रमयी भूमिरधस्तस्य हुताशनः ॥१२.४ ॥

तत्तापतप्ता सर्वाशा प्रोद्यदिन्दुसमप्रभा ।
विभात्यतिमहारौद्रा दर्शनस्पर्शनादिषु ॥१२.५ ॥

तस्यां बद्धः कराभ्याञ्च पद्भ्याञ्चैव यमानुगैः ।
मुच्यते पापकृन्मध्ये लुठमानः स गच्छति ॥१२.६ ॥

काकैर्वकैर्वृकोलूकैर्वृश्चिकैर्मशकैस्तथा ।
भक्षयमाणस्तथा गृध्रैर्द्रुतं मार्गे विकृष्यते ॥१२.७ ॥

दह्यमानः पितर्मातर्भ्रातस्ताततेति चाकुलः ।
वदत्यसकृदुद्विग्नो न शान्तिमधिगच्छति ॥१२.८ ॥

एवं तस्मान्नरैर्ममोक्षो ह्यतिक्रान्तैरवाप्यते ।
वर्षायुतायुतैः पापं यैः कृतं दुष्टबुद्धिभिः ॥१२.९ ॥

तथान्यस्तु तमो नाम सोऽतिशीतः स्वभावतः ।
महारौरववद् दीर्घस्तथा स तमसा वृतः ॥१२.१० ॥

शीतार्तास्तत्र धावन्तो नरास्तमसि दारुणे ।
परस्परं समासाद्य परिरभ्याश्रयन्ति च ॥१२.११ ॥

दन्तास्तेषाञ्च भज्यन्ते शीतार्तिपरिकम्पिताः ।
क्षुत्तृष्णाप्रबलास्तत्र तथैवान्येऽप्युपद्रवाः ॥१२.१२ ॥

हिमखण्डवहो वायुर्भिनत्त्यस्थीनि दारुणः ।
मज्जासृग्गलितं तस्मादश्नुवन्ति क्षुधान्विताः ॥१२.१३ ॥

लेलिह्यमाना भ्राम्यन्ते परस्परसमागमे ।
एवं तत्रापि सुमहान् क्लेशस्तमसि मानवैः ॥१२.१४ ॥

प्राप्यते ब्राह्मणश्रेष्ठ यावद्दुष्कृतसंक्षयः ।
निकृन्तन इति ख्यातस्ततोऽन्यो नरकोत्तमः ॥१२.१५ ॥

तस्मिन् कुलालचक्राणि भ्राम्यन्त्यविरतं पितः ।
तेष्वारोप्य निकृत्यन्ते कालसूत्रेण मानवाः ॥१२.१६ ॥

यमानुगाङ्गुलिस्थेन आपादतलमस्तकम् ।
न चैषां जीवितभ्रंशो जायते द्विजसत्तम ॥१२.१७ ॥

छिन्नानि तेषां शतशः खण्डान्यैक्यं व्रजन्ति च ।
एवं वर्षसहस्राणि छिद्यन्ते पापकर्मिणः ॥१२.१८ ॥

तावद् यावदशेषं वै तत्पापं हि क्षयं गतम् ।
अप्रतिष्ठञ्च नरकं शृणुष्व गदतो मम ॥१२.१९ ॥

अत्रस्थैर्नारकैर्दुःखमसह्यमनुभूयते ।
तान्येव यत्र चक्राणि घटीयन्त्राणि चान्यतः ॥१२.२० ॥

दुःखस्य हेतुभूतानि पापकर्मकृतां नृणाम् ।
चक्रेष्वारोपिताः केचिद् भ्राम्यन्ते तत्र मानवाः ॥१२.२१ ॥

यावद्वर्षसहस्राणि न तेषां स्थितिरन्तरा ।
घटीयन्त्रेषु चैवान्यो बद्धस्तोये यथा घटी ॥१२.२२ ॥

भ्राम्यन्ते मानवा रक्तमुदिगरन्तः पुनः पुनः ।
अस्त्रैर्मुखविनिष्क्रान्तैः नेत्रैरश्रुविलम्बिभिः ॥१२.२३ ॥

दुः खानि ते प्राप्नुवन्ति यान्यसह्यानि जन्तुभिः ।
असिपत्रवनं नाम नरकं शृणु चापरम् ॥१२.२४ ॥

योजनानां सहस्रं यो ज्वलदग्न्यास्तृतावनिः ।
तप्ताः सूर्यकरैश्चण्डैर्यत्रातीव सुदारुणैः ॥१२.२५ ॥

प्रपतन्ति सदा तत्र प्राणिनो नरकौकसः ।
तन्मध्ये च वनं रम्यं स्निग्धपत्रं विभाव्यते ॥१२.२६ ॥

पत्राणि तत्र खड्गानां फलानि द्विजसत्तमम् ।
श्वानश्च तत्र सबलाः स्वनन्त्ययुतशोभिताः ॥१२.२७ ॥

महावक्त्रा महादंष्ट्रा व्याघ्रा इव भयानकाः ।
ततस्तद्वनमालोक्य शिशिरच्छायमग्रतः ॥१२.२८ ॥

प्रयान्ति प्राणिनस्तत्र तीव्रतृट्परिपीडिताः ।
हा मातर्हा तात ! इति क्रान्दन्तोऽतीव दुः खिता ॥१२.२९ ॥

दह्यमानाङ्घ्रियुगला धरणीस्थेन वह्निना ।
तेषां गतानां तत्रासिपत्रपाती समीरणः ॥१२.३० ॥

प्रवाति तेन पात्यन्ते तेषां खड्गान्यथोपरि ।
ततः पतन्ति ते भूमौ ज्वलत्पवकसञ्चये ॥१२.३१ ॥

लेलिह्यमाने चान्यत्र व्याप्ताशेषमहीतले ।
सारमेयास्ततः शीघ्रं शातयन्ति शरीरतः ॥१२.३२ ॥

तेषामङ्गानि रुदतामनेकान्यतिभीषणाः ।
असिपत्रवनं तात ! मयैतत् कीर्तितं तव ॥१२.३३ ॥

अतः परं भीमतरं तप्तकुम्भं निबोध मे ।
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृताः ॥१२.३४ ॥

ज्वलदग्निचयोद्वृत्ततैलायश्चूर्णपूरिताः ।
तेषु दुष्कृतकर्माणो याम्यैः क्षिप्ता ह्यधोमुखाः ॥१२.३५ ॥

क्वाथ्यन्ते विस्फुटद्गात्र-गलन्मज्जजलाविलाः ।
स्फुरत्कपालनेत्रास्थिच्छिद्यमाना विभीषणैः ॥१२.३६ ॥

गृध्रैरुत्पाट्य मुच्यन्ते पुनस्तेष्वेव वेगितैः ।
पुनः सिमसिमायन्ते तैलेनैक्यं व्रजन्ति च ॥१२.३७ ॥

द्रवीभूतैः शिरोगात्र-स्नायु-मांस-त्वगस्थिभिः ।
ततो याम्यैर्नरैराशु दर्व्या घट्टनघट्टिताः ॥१२.३८ ॥

कृतावर्ते महातैले मथ्यन्ते पापकर्मिणः ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पितः ॥१२.३९ ॥

इति श्रीमार्कण्डेयपुराणे पिताः पुत्रसंवादे
महारौरवादिनरकाख्यानं नाम द्वादशोऽध्यायः

त्रयोदशोऽध्यायः

पुत्र उवाच

अहं वैश्यकुले जातो जन्मन्यस्मात्तु सप्तमे ।
समतीते गवां रोधं निपाने कृतवान् पुरा ॥१३.१ ॥

विपाकात् कर्मणस्तस्य नरकं भृशदारुणम् ।
सम्प्राप्तोऽग्निशिखाघोरमयोमुखखगाकुलम् ॥१३.२ ॥

यन्त्रपीडनगात्रासृक्-प्रवाहोद्भूतकर्दमम् ।
विशस्यमानदुष्कर्मि-तन्निपातरवाकुलम् ॥१३.३ ॥

पात्यमानस्य मे तत्र साग्रं वर्षशतं गतम् ।
महातापार्तितप्तस्य तृष्णादाहान्वितस्य च ॥१३.४ ॥

तत्राह्लादकरः सद्यः पवनः सुखशीतलः ।
करम्भ-बालुकाकुम्भ-मध्यस्थो मे समागतः ॥१३.५ ॥

तत्सम्पर्कादशेषाणां नाभवद्यातना नृणाम् ।
मम चापि यथा स्वर्गे स्वर्गिणां निर्वृतिः परा ॥१३.६ ॥

किमेतदिति चाह्लाद-विस्तारस्तिमितेक्षणैः ।
दृष्टमस्माभिरासन्नं नररत्नमनत्तमम् ॥१३.७ ॥

याम्यश्च पुरुषो घोरो दण्डहस्तोऽशनिप्रभः ।
पुरतो दर्शयन् मार्गमिति एहीति वगथ ॥१३.८ ॥

पुरुषः स तदा दृष्ट्वा यातनाशतसंकुलम् ।
नरकं प्राह तं याम्यं किङ्करं कृपयान्वितः ॥१३.९ ॥

पुरुष उवाच

भो याम्यपुरुषाचक्ष्व किं मया दुष्कृतं कृतम् ।
येनेदं यातनाभीम् प्राप्तोऽस्मि नरकं परम् ॥१३.१० ॥

विपश्चिदिति विख्यातो जनकानामहं कुले ।
जातो विदेहविषये सम्यङ्मनुजपालकः ॥१३.११ ॥

यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही ।
नोत्सृष्टश्चैव संग्रामो नातिथिर्विमुखो गतः ॥१३.१२ ॥

पितृ-देवर्षि-भृत्याश्च न चापचरिता मया ।
कृता स्पृहा च न मया परस्त्रीविभवादिषु ॥१३.१३ ॥

पर्वकालेषु पितरस्तिथिकालेषु देवताः ।
पुरुषं स्वयमायान्ति निपानमिव धेनवः ॥१३.१४ ॥

यतस्ते विमुखा यान्ति निश्वस्य गृहमेधिनः ।
तस्मादिष्टश्च पूर्तश्च धमौ द्वावपि नश्यतः ॥१३.१५ ॥

पितृनिश्वासविध्वस्तं सप्तजन्मार्जितं शुभम् ।
त्रिजन्मप्रभवं दैवो निश्वासो हन्त्यसंशयम् ॥१३.१६ ॥

तस्माद् दैवे च पित्र्ये च नित्यमेवोद्यतोऽभवम् ।
सोऽहं कथमिमं प्राप्तो नरङ्क भृशदारुणम् ॥१३.१७ ॥

इति श्रीमार्कण्डेयपुराणे पिता-पुत्रसंवादो नाम

त्रयोदशोऽध्यायः

चतुर्दशोऽध्यायः

पुत्र उवाच

इति पृष्टस्तदा तेन शृण्वतां नो महात्मना ।
उवाच पुरुषो याम्यो घोरोऽपि प्रसृतं वचः ॥१४.१॥

यमकिङ्कर उवाच

महाराज ! यथात्थ त्वं तथैतन्नात्र संशयः ।
किन्तु स्वल्पं कृतं पापं भवता स्मारयामि तत् ॥१४.२॥

वैदर्भी तव या पत्नी पीवरी नाम नामतः ।
ऋतुमत्या ऋतुर्वन्ध्यस्त्वया तस्याः कृतः पुरा ॥१४.३॥

शुशोभनायां कैकेय्यामासक्तेन ततो भवान् ।
ऋतुव्यतिक्रमात् प्राप्तो नरकं घोरमीदृशम् ॥१४.४॥

होमकाले यथा वह्निराज्यपातमवेक्षते ।
ऋतौ प्रजापतिस्तद्वद् बीजपातमवेक्षते ॥१४.५॥

यस्तमुल्लङ्घ्य धर्मात्मा कामेष्वासक्तिमान् भवेत् ।
स तु पित्र्यादृणात् पापमवाप्य नरकं पतेत् ॥१४.६॥

एतावदेव ते पापं नान्यत् किञ्चन विद्यते ।
तदेहि गच्छ पुण्यानामुपभोगाय पार्थिव ॥१४.७ ॥

राजोवाच

यास्यामि देवानुचर यत्र त्वं मां नयिष्यसि ।
किञ्चित् पृच्छामि तन्मे त्वं यथावद्वक्तुमर्हसि ॥१४.८ ॥

वज्रतुण्डास्त्वमी काकाः पुंसां नयनहारिणः ।
पुनः पुनश्च नेत्राणि तद्वदेषां भवन्ति हि ॥१४.९ ॥

किं कर्म कृतवन्तश्च कथयैतज्जुगुप्सितम् ।
हरन्त्येषां तथा जिह्वां जायमानां पुनर्नवाम् ॥१४.१० ॥

परपत्रेण पाट्यन्ते कस्मादेतेऽतिदुःखिताः ।
करम्भवालुकास्वेते पच्यन्ते तैलगोचराः ॥१४.११ ॥

अयोमुखैः खगैश्चैते कृष्यन्ते किंविधा वद ।
विश्लिष्टदेहबन्धार्ति-महारावविराविणः ॥१४.१२ ॥

अयश्चञ्चुनिपातेन सर्वाङ्गक्षतदुःखिताः ।
किमेतेऽनिष्टकर्तारस्तुद्यन्तेऽहर्निशं नराः ॥१४.१३ ॥

एताश्चान्याश्च दृश्यन्ते यातनाः पापकर्मिणाम् ।
येन कर्मविपाकेण तन्ममाशेषतो वद ॥१४.१४ ॥

यमकिङ्कर उवाच

यन्मां पृच्छसि भूपाल ! पापकर्मफलोदयम् ।
तत् तेऽहं सम्प्रवक्षयामि संक्षेपेण यथातथम् ॥१४.१५ ॥

पुण्यापुण्ये हि पुरुषः पर्यायेण समश्नते ।
भुञ्जतश्च क्षयं याति पापं पुण्यमथापि वा ॥१४.१६ ॥

न तु भोगादृते पुण्यं किञ्चिद्वा कर्म मानवम् ।
पापकं वा पुनात्याशु क्षयो भोगात् प्रजायते ॥१४.१७ ॥

परित्यजति भोगाच्च पुण्यापुण्ये निबोध मे ।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम् ॥१४.१८ ॥

मृतेभ्यः प्रमृता यान्ति दरिद्राः पापकर्मिणः ।
गतिं नानाविधां यान्ति जन्तवः कर्मबन्धनात् ॥१४.१९ ॥

उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखम् ।
श्रद्धधानाश्च शान्ताश्च धनदाः शुभकारिणः ॥१४.२० ॥

व्यालकुञ्जरदुर्गाणि सर्पचौरभयानि तु ।
हताः पापेन गच्छन्ति पापिनः किमतः परम् ॥१४.२१ ॥

अनेकशतसाहस्त्र-जन्मसंचयसञ्चितम् ।
पुण्यापुण्यं नृणां तद्वत् सुखदुःखाङ्कुरोद्भवम् ॥१४.२३ ॥

यथा बीजं हि भूपाल ! पयांसि समवेक्षते ।
पुण्यापुण्ये तथा कालदेशान्यकर्मकारकम् ॥१४.२४ ॥

स्वल्पं पापं कृतं पुंसा देशकालोपपादितम् ।
पादन्यासकृतं दुः खं कण्टकोत्थं प्रयच्छति ॥१४.२५ ॥

तत् प्रभूततरं स्थूलं शूलकीलकसम्भवम् ।
दुः खं यच्छति तद्वच्च शिरोरोगादि दुः सहम् ॥१४.२६ ॥

अपथ्याशनशीतोष्ण-श्रमतापादिकारकम् ।
तथान्योऽन्यमपेक्षन्ते पापानि फलसङ्गमे ॥१४.२७ ॥

एवं महान्ति पापानि दीर्घरोगादिविक्रियाम् ।
तद्वच्छस्त्राग्निकृच्छ्रार्ति-बन्धनादिफलाय वै ॥१४.२८ ॥

स्वल्पं पुण्यं शुभं गन्धं हेलया सम्प्रयच्छिति ।
स्पर्श वाप्यथवा शब्दं रसं रूपमथापि वा ॥१४.२९ ॥

चिराद् गुरुतरं तद्वन्महान्तमपि कालजम् ।
एवञ्च सुखदुः खानि पुण्यापुण्योद्भवानि वै ॥१४.३० ॥

भुञ्जानोऽनेकसंसार-सम्भवानीह तिष्ठति ।
जाति देशावरुद्धानि ज्ञानाज्ञानफलानि च ॥१४.३१ ॥

तिष्णन्ति तत्र युक्तानि लिङ्गमात्रेण चात्मनि ।
वपुषा मनसा वाचा न कदाचित् क्वचिन्नरः ॥१४.३२ ॥

अकुर्वन् पापकं कर्म पुण्यं वाप्यवतिष्ठते ।
यद् यत् प्राप्नोति पुरुषो दुः खं सुखमथापि वा ॥१४.३३ ॥

प्रभूतमथवा स्वल्पं विक्रियाकारि चेतसः ।
तावता तस्य पुण्यं वा पापं वाप्यथ चेतरत् ॥१४.३४ ॥

उपभोगात् क्षयं याति भुज्यमानमिवाशनम् ।
एवमेते महापापं यातनाभिरहर्निशम् ॥१४.३५ ॥

क्षपयन्ति नरा घोरं नरकान्तर्विवर्तिनः ।
तथैव राजन् ! पुण्यानि स्वर्गलोकेऽमरैः सह ॥१४.३६ ॥

गन्धर्वसिद्धाप्सरसां गीताद्यैरुपभुञ्जते ।
देवत्वे मानुषत्वे च तिर्यक्त्वे च शुभाशुभम् ॥१४.३७ ॥

पुण्यपापोद्भवं भुङ्क्ते सुखदुःखोपलक्षणम् ।
यद् त्वं पृच्छसि मां राजन् ! यातनाः पापकर्मिणाम् ।
केन केनेति पापेन तत् ते वक्षयाम्यशेषतः ॥१४.३८ ॥

दुष्टेन चक्षुषा दृष्टाः परदारा नराधमैः ।
मानसेन च दुष्टेन परद्रव्यञ्च सस्पृहैः ॥१४.३९ ॥

वज्रतुण्डाः खगास्तेषां हरन्त्येते विलोचने ।
पुनः पुनश्च सम्भूतिरक्ष्णोरेषां भवत्यथ ॥१४.४० ॥

यावतोऽक्षिनिमेषांस्तु पापमेभिर्नृभिः कृतम् ।
तावद्वर्षसहस्राणि नेत्रात्ति प्राप्नुवन्त्युत ॥१४.४१ ॥

असच्छास्त्रोपदेशास्तु यैर्दत्ता यैश्च मन्त्रिताः ।
सम्यग्दृष्टेर्विनाशाय रिपूणामपि मानवैः ॥१४.४२ ॥

यैः शास्त्रमन्यथा प्रोक्तं यैरसद्वागुदाहृता ।
वेददेवद्विजातीनां गुरोर्निन्दा च यैः कृता ॥१४.४३ ॥

हरन्ति तेषां जिह्वाश्च जायमानाः पुनः पुनः ।
तावतो वत्सरानेते वज्रतुण्डाः सदारुणाः ॥१४.४४ ॥

मित्रभेदं तथा पित्रा पुत्रस्य स्वजनस्य च ।
याज्योपाध्याययोर्मात्रा सुतस्य सहचारिण: ॥१४.४५ ॥

भार्यापत्योश्च ये केचिद् भेदं चक्रुर्नराधमा: ।
त इमे पश्य पाट्यन्ते करपत्रेण पार्थिव ॥१४.४६ ॥

परोपतापका ये च ये चाह्लादनिषेधका: ।
तालवृन्तानिलस्थान-चन्दनोशीरहारिण: ॥१४.४७ ॥

प्राणान्तिकं ददुस्तापमदुष्टानाञ्च येऽधमा: ।
करम्भवालुकासंस्थास्त इमे पापभागिन: ॥१४.४८ ॥

भुङ्क्ते श्राद्धन्तु योऽन्यस्य नरोऽन्येन निमन्त्रित: ।
दैवे वाप्यथवा पित्र्ये स द्विधा कृष्यते खगै: ॥१४.४९ ॥

मर्माणि यस्तु साधूनामसद्वाग्भिर्निकृन्तति ।
तमिमे तुदमानास्तु खगास्तिष्ठन्त्यवारिता ॥१४.५० ॥

य: करोति च पैशुन्यमन्यवागन्यथामति: ।
पाट्यते हि द्विधा जिह्वा तस्येत्थं निशितै: क्षुरै: ॥१४.५१ ॥

माता-पित्रोर्गुरूणाञ्च येऽवज्ञां चक्रुरुद्धता: ।
त इमे पूयविण्मूत्र-गर्ते मज्जन्त्यधोमुखा: ॥१४.५२ ॥

देवतातिथिभूतेषु भृत्येष्वभ्यागतेषु च ।
अभुक्तवत्सु येऽश्नन्ति तद्वत् पित्रग्निपक्षिषु ॥१४.५३ ॥

दुष्टास्ते पूयनिर्यास-भुज: सूचीमुखास्तु ते ।
जायन्ते गिरिवर्ष्माण: पश्यैते यादृशा नरा: ॥१४.५४ ॥

एकपङ्क्त्या तु ये विप्रमथवेतरवर्णजम् ।
विषमं बोजयन्तीह विड्भुजस्त इमे यथा ॥१४.५५ ॥

एकसार्थप्रयातं ये निः स्वमर्थार्थिनं नरम् ।
अपास्य स्वान्नमश्नन्ति त इमे श्लेष्मभोजिनः ॥१४.५६ ॥

गोबाह्मणाग्नयः स्पृष्टा यैरुच्छिष्टैर्नरेश्वर ।
तेषामेतेऽग्निकुम्भेषु लेलिह्यन्त्याहिताः कराः ॥१४.५७ ॥

सूर्येन्दुतारका दृष्टा यैरुच्छिष्टैस्तु कामतः ।
तेषां याम्यैर्नरैर्नेत्रे न्यस्तो वह्निः समेध्यते ॥१४.५८ ॥

गावोऽग्निर्जननी विप्रोज्येष्ठभ्राता पिता स्वसा ।
जामयो गुरवो वृद्धा यैः स्पृष्टास्तु पदा नृभिः ॥१४.५९ ॥

बद्धाङ्घ्रयस्ते निगडैर्लौहैरग्निप्रतापितैः ।
अङ्गारराशिमध्यस्थास्तिष्ठन्त्याजानुदाहिनः ॥१४.६० ॥

पायसं कृशरं छागो देवान्नानि च यानि वै ।
भुक्तानि यैरसंस्कृत्य तेषां नेत्राणि पापिनाम् ॥१४.६१ ॥

निपातितानां भूपृष्ठे उद्वृत्ताक्षि निरीक्षताम् ।
सन्दंशैः पश्य कृष्यन्ते नरैर्याम्यैर्मुखात् ततः ॥१४.६२ ॥

गुरु-देव-द्विजातीनां वेदानाञ्च नराधमैः ।
निन्दा निशामिता यैश्च पापानामभिनन्दताम् ॥१४.६३ ॥

तेषामयोमयान् कीलानग्निवर्षान् पुनः पुनः ।
कर्णेषु प्रेरयन्त्येते याम्या विलपतामपि ॥१४.६४ ॥

यैः प्रपा-देवविप्रौको-देवालयसभाः शुभाः ।
भङ्त्क्वा विध्वंसमानीताः क्रोधलोभानुवर्तिभिः ॥१४.६५ ॥

तेषामेतैः शितैः शस्त्रैर्मुहुर्विलपतां त्वचः ।
पृथक् कुर्वन्ति वै याम्याः शरीरादतिदारुणाः ॥१४.६६ ॥

गोब्राह्मणार्कमार्गेषु येऽवमेहन्ति मानवाः ।
तेषामेतानि कृष्यन्ते गुदेनान्त्राणि वायसैः ॥१४.६७ ॥

दत्त्वा कन्यां च एकस्मै द्वितीयाय प्रयच्छति ।
स त्वेवं नैकधाच्छिन्नः क्षारनद्यां प्रवाह्यते ॥१४.६८ ॥

स्वपोषणपरो यस्तु परित्यजति मानवः ।
पुत्र-भृत्य-कलत्रादि-बन्धुवर्गमकिञ्चिनम् ॥१४.६९ ॥

दुर्भिक्षे सम्भ्रमे वापि सोऽप्येवं यमकिङ्करैः ।
उत्कृत्य दत्तानि मुखे स्वमांसान्यश्नुते क्षुधा ॥१४.७० ॥

शरणागतान् यस्त्यजति लोभाद् वृत्त्युपजीविनः ।
सोऽप्येवं यन्त्रपीडाभिः पीड्यते यमकिङ्करैः ॥१४.७१ ॥

सुकृतं ये प्रयच्छन्ति यावज्जन्म कृतं नराः ।
ते पिष्यन्ते शिलापेषैर्यथैते पापकर्मिणः ॥१४.७२ ॥

न्यासापहारिणो बद्धाः सर्वगात्रेषु बन्धनैः ।
कृमिवृश्चिककाकोलैर्भुज्यन्तेऽहर्निशं नराः ॥१४.७३ ॥

क्षुत्क्षामास्तृट्पतज्जिह्वा-तालवो वेदनातुराः ।
दिवामैथुनिनः पापाः परदारभुजश्च ये ॥१४.७४ ॥

तथैव कण्टकैर्दैर्घैरायसैः पश्य शाल्मलिम् ।
आरोपिता विभिन्नाङ्गाः प्रभूतासृक्स्त्रवाविलाः ॥१४.७५॥

मूषायामपि पश्यैतान् नाश्यमानान् यमानुगैः ।
पुरुषैः पुरुषाव्याघ्र ! परदारावमर्षिणः ॥१४.७६॥

उपाद्यायमधः कृत्वा स्तब्धो योऽध्ययनं नरः ।
गृह्णाति शिल्पमथवा सोऽप्येवं शिरसा शिलाम् ॥१४.७७॥

बिभ्रत् क्लेशमवाप्नोति जनमार्गेऽतिपीडितः ।
क्षुत्क्षामोऽहर्निशं भारपीडाव्यथितमस्तकः ॥१४.७८॥

मूत्र-श्लेष्म-पूरीषाणि यैरुत्सृष्टानि वारिणि ।
त इमे श्लेष्मविण्मूत्र-दुर्गन्धं नरकं गताः ॥१४.७९॥

परस्परञ्च मांसानि भक्षयन्ति क्षुधान्विताः ।
भुक्तं नातिथ्यविधिना पूर्वमेभैः परस्परम् ॥१४.८०॥

अपविद्धास्तु यैर्वेदा वहनयश्चाहिताग्निभिः ।
त इमे शालशृङ्गाग्रात् पात्यन्तेऽधः पुनः पुनः ॥१४.८१॥

पुनर्भूपतयो जीर्णा यावज्जीवन्ति ये नराः ।
इमे कृमित्वमापन्ना भक्षयन्तेऽत्र पिपीलिकैः ॥१४.८२॥

पतितप्रतिग्रहादानाद्यजनान्नित्यसेवनात् ।
पाषाणमध्यकीटत्वं नरः सततमश्नुते ॥१४.८३॥

पश्यतो भृत्यवर्गस्य मित्राणामतिथेस्तथा ।
एको मिष्टान्नभुग् भुङ्क्ते ज्वलदङ्गारसञ्चयम् ॥१४.८४॥

वृकैर्भयङ्करैः पृष्ठं नित्यमस्योपभुज्यते ।
पृष्ठमांसं नृपैतेन यतो लोकस्य भक्षितम् ॥१४.८५ ॥

अन्धोऽथ बधिरो मूको भ्राम्यतेऽयं क्षुधातुरः ।
अकृतज्ञोऽधमः पुंसामुपकारेषु वर्तताम् ॥१४.८६ ॥

अयं कृतघ्नो मित्राणामपकारी सुदुर्मतिः ।
तत्पकुम्भे निपतति ततो यास्यति पेषणम् ॥१४.८७ ॥

करम्भवालुकां तस्मात् ततो यन्त्रानपीडनम् ।
असिपत्रवनं तस्मात् करपत्रेण पाटनम् ॥१४.८८ ॥

कालसूत्रे तथा छेदमनेकाश्चैव यातनाः ।
प्राप्य निष्कृतिमेतस्मान्न वेद्मि कथमेष्यति ॥१४.८९ ॥

श्राद्धसङ्गतिनो विप्राः समुत्पत्य परस्परम् ।
दुष्टा हि निः सृतं फेनं सर्वाङ्गेभ्यः पिबन्ति वै ॥१४.९० ॥

सुवर्णस्तेयी विप्रघ्नः सुरापी गुरुतल्पगः ।
अधश्चोर्ध्वञ्च दीप्ताग्नौ दह्यमानाः समन्ततः ॥१४.९१ ॥

तिष्ठन्त्यब्दसहस्राणि सुबहूनि ततः पुनः ।
जायन्ते मानवाः कुष्ठ-क्षयरोगादिचिह्नताः ॥१४.९२ ॥

मृताः पुनश्च नरकं पुनर्जाताश्च तादृशम् ।
व्याधिमृच्छन्ति कल्पान्तपरिमाणं नराधिप ॥१४.९३ ॥

गोघ्नो न्यूरतरं याति नरकेऽथ त्रिजन्मनि ।
तथोपपातकानाञ्च सर्वेषामिति निश्चयः ॥१४.९४ ॥

नरकप्रच्युता यानि यैर्यैर्विहितपातकैः ।
प्रयान्ति योनिजातानि तन्मे निगदतः शृणु ॥१४.९५ ॥

इति श्रीमार्कण्डेयपुराणे जडोपाख्याने यमकिङ्करसंवादो नाम चतुर्दशोऽध्यायः

पञ्चदशोऽध्यायः

यमकिङ्कर उवाच

पतितात् प्रतिगृह्यार्थं खरयोनिं व्रजेद् द्विजः ।
नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः ॥१५.१ ॥

उपाध्यायव्यलीकन्तु कृत्वा श्वा भवति द्विजः ।
तज्जायां मनसावाञ्छन् तद्द्रव्यञ्चाप्यसंशयम् ॥१५.२ ॥

गर्दभो जायते जन्तुः पित्रोश्चाप्यवमानकः ।
मातापितरावाक्रुश्य शारिका सम्प्रजायते ॥१५.३ ॥

भ्रातुः पत्न्यवमन्ता च कपोतत्वं प्रपद्यते ।
तामेव पीडयित्वा तु कच्छपत्वं प्रपद्यते ॥१५.४ ॥

भर्तृपिण्डमुपाश्नन् यस्तदिष्टं न निषेवते ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥१५.५ ॥

न्यासापहर्ता नरकाद्विमुक्तो जायते कृमिः ।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥१५.६ ॥

विश्वासहन्ता च नरो मीनयोनौ प्रजायते ।
धान्यं यवांस्तिलान् माषान् कुलत्थान् सर्षपांश्चणान् ॥१५.७॥

कलायान कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्यान्यन्यानि वा हृत्वा मोहाज्जन्तुरचेतनः ॥१५.८॥

सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभः ।
परदाराभिमर्षात्तु वृको घोरोऽभिजायते ॥१५.९॥

श्वा शृगालो वको गृध्रो व्याडः कङ्कस्तथा क्रमात् ।
भ्रातृभार्याञ्च दुर्बुद्धिर्यो धर्षयति पापकृत् ॥१५.१०॥

पुंस्कोकिलत्वमाप्नोति स चापि नरकाच्च्युतः ।
सखिभार्यां गुरोर्भार्यां राजभार्याञ्च पापकृत् ॥१५.११॥

प्रधर्षयित्वा कामात्मा शूकरो जायते नरः ।
यज्ञ-दान-विवाहानां विघ्नकर्ता भवेत् कृमिः ॥१५.१२॥

पुनर्दात् च कन्यायाः कृमिरेवोपजायते ।
देवता-पितृ-विप्राणामदत्वा योऽन्नमश्नुते ॥१५.१३॥

प्रमुक्तो नरकात् सोऽपि वायसः सम्प्रजायते ।
ज्येष्ठं पितृसमं वापि भ्रातरं योऽवमन्यते ॥१५.१४॥

नरकात् सोऽपि विभ्रष्टः क्रौञ्चयोनौ प्रजायते ।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ॥१५.१५॥

तस्यामपत्यमुत्पाद्य काष्ठान्तः कीटको भवेत् ।
शूकरः कृमिको मद्गुश्चण्डालश्च प्रजायते ॥१५.१६॥

अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः ।
कृतघ्रः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ॥१५.१७॥

मत्स्यस्तु वायसः कूर्मः पुक्कसो जायते ततः ।
अशस्त्रं पुरुषं हत्वा नरः सञ्जायते खरः ॥१५.१८॥

कृमिः स्त्रीवधकर्ता च बालहन्ता च जायते ।
भोजनं चोरयित्वा तु मक्षिका जायते नरः ॥१५.१९॥

तत्राप्यस्ति विशेषो वै भोजनस्य शृणुष्व तत् ।
हृत्वान्नन्तु स मार्जारो जायते नरकाच्च्युतः ॥१५.२०॥

तिलपिण्याकसंमिश्रमन्नं हृत्वा तु मूषिकः ।
घृतं हृत्वा च नकुलः काको मद्गुरजामिषम् ॥१५.२१॥

मत्स्यमांसापहृत् काकः श्येनो मार्गामिषापहृत् ।
वीचीकाकस्त्वपहृते लवणे दधनि कृमिः ॥१५.२२॥

चोरयित्वा पयश्चापि बलाका सम्प्रजायते ।
यस्तु चोरयते तैलं तैलपायी स जायते ॥१५.२३॥

मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ।
चोरयित्वा तु निष्पावान् जायते गृहगोलकः ॥१५.२४॥

आसवं चोरयित्वा तु तित्तिरित्वमवाप्नुयात् ।
अयो हृत्वा तु पापात्मा वायसः सम्प्रजायते ॥१५.२५॥

हृते कांस्ये च हारीतः कपोतो रुप्यभाजने ।
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥१५.२६॥

पत्रोर्णं चोरयित्वा तु क्रकरत्वञ्च गच्छति ।
कोषकारश्च कौषेये हृते वस्त्रेऽभिजायते ॥१५.२७॥

दुकूले शार्ङ्गकः पापो हृते चैवांशुके शुकः ।
तथैवाजाविकं हृत्वा वस्त्रं क्षौमं च जायते ॥१५.२८॥

कार्पासिके हृते क्रौञ्चो वाल्कहर्ता बकस्तथा ।
मयूरो वर्णकान् हृत्वा शाकपत्रं च जायते ॥१५.२९॥

जीवज्जीवकतां याति रक्तवस्त्रापहृन्नरः ।
छुच्छुन्दरिः शुभान् गन्धान् वासो हृत्वा शशो भवेत् ॥१५.३०॥

षण्ढः फलापहरणात् काष्ठस्य घुणकीटकः ।
पुष्पापहृद् दरिद्रश्च पङ्गुर्यानापहृन्नरः ॥१५.३१॥

शाकहर्ता च हारीतस्तोयहर्ता च चातकः ।
भूहर्ता नरकान् गत्वा रौरवादीन् सुदारुणान् ॥१५.३२॥

तृण-गुल्म-लता-वल्लि-त्वक्सारतरुतां क्रमात् ।
प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः ॥१५.३३॥

कृमिः कीटः पतङ्गोऽथ पक्षी तोय चरो मृगः ।
गोत्वं प्राप्य च चण्डाल-पुक्कसादि जुगुप्सितम् ॥१५.३४॥

पङ्ग्वन्धो वधिरः कुष्ठी यक्ष्मणा च प्रपीडितः ।
मुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥१५.३५॥

अपस्मारी च भवति शूद्रत्वं च स गच्छति ।
एष एव क्रमो दृष्टो गोसुवर्णापहारिणाम् ॥१५.३६॥

विद्यापहारिणश्चोग्रा निष्क्रयभ्रंशिनो गुरोः ।
जायामन्यस्य पुरुषः पारख्यां प्रतिपादयन् ॥१५.३७ ॥

प्राप्नोति षण्ढतां मूढो यातनाभ्यः परिच्युतः ।
यः करोति नरो होममसमिद्धे विभावसौ ॥१५.३८ ॥

सोऽजिर्णव्याधिदुःखार्तो मन्दाग्निः संप्रजायते ।
परनिन्दा कृतघ्रत्वं परमर्मावघट्टनम् ॥१५.३९ ॥

नैष्ठुर्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥१५.४० ॥

निकृत्या कञ्चनं नृणां कार्पण्यं च नृणां वधः ।
यानि च प्रतिषिद्धानि तत्प्रवृत्तिश्च सन्तता ॥१५.४१ ॥

उपलक्षयाणि जानीयान्मुक्तानां नरकादनु ।
दया भूतेषु संवादः परलोकप्रतिक्रिया ॥१५.४२ ॥

सत्यं भूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम् ।
गुरु-देवर्षि-सिद्धर्षिपूजनं साधुसङ्गमः ॥१५.४३ ॥

सत्क्रियाभायसनं मैत्रीमिति बुध्यते पण्डितः ।
अन्यानि चैव सद्धर्मङ्क्रियाभूतानि यानि च ॥१५.४४ ॥

स्वर्गच्युतानां लिङ्गानि पुरुषाणामपापिनाम् ।
एतदुद्देशतो राजन् भवतः कथितं मया ॥१५.४५ ॥

स्वकर्मफलभोक्तॄणां पुण्यानां पापिनां तथा ।
तदेह्यन्यत्र गच्छामो दृष्टं सर्वं त्वयाधुना ।
त्वया दृष्टो हि नरकस्तदेह्यन्यत्र गम्यताम् ॥१५.४६ ॥

पुत्र उवाच

ततस्तमग्रतः कृत्वा स राजा गन्तुमुद्यतः ।
ततश्च सर्वैरुत्क्रुष्टं यातनास्थायिभिर्नृभिः ॥१५.४७॥

प्रसादं कुरु भूपेति तिष्ठ तावन्मुहूर्तकम् ।
त्वदङ्गसङ्गी पवनो मनो ह्लादयते हि नः ॥१५.४८॥

परितापञ्च गात्रेभ्यः पीडाबाधाश्च कृत्स्नशः ।
अपहन्ति नरव्याघ्र यदां कुर महीपते ॥१५.४९॥

एतच्छ्रुत्वा वचस्तेषां तं याम्यपुरुषं नृपः ।
पप्रच्छ कथमेतेषामाह्लादो मयि तिष्ठति ॥१५.५०॥

किं मया कर्म तत् पुण्यं मर्त्यलोके महत् कृतम् ।
आह्लाददायिनी व्युष्टिर्येनेयं तदुदीरय ॥१५.५१॥

यमपुरुष उवाच

पितृदेवातिथिप्रैष्य-शिष्टेनान्नेन ते तनुः ।
पुष्टिमभ्यागता यस्मात् तद्गतं च मनो यतः ॥१५.५२॥

ततस्त्वद्गात्रसंसर्गो पवनो ह्लाददायकः ।
पापकर्मकृतो राजन् यातना न प्रबाधते ॥१५.५३॥

अश्वमेधादयो यज्ञास्त्वयेष्टा विधिवद्यतः ।
ततस्त्वद्दर्शनाद्याम्या यन्त्रशस्त्राग्निवायसाः ॥१५.५४ ॥

पीडन-च्छेद-दाहादि-महादुःखस्य हेतवः ।
मृदुत्वमागता राजन् तेजसापहतास्तव ॥१५.५५ ॥

राजोवाच

न स्वर्गे ब्रह्मलोके वा तत् सुखं प्राप्यते नरैः ।
यदार्तजन्तुनिर्वाण-दानोत्थमिति मे मतिः ॥१५.५६ ॥

यदि मत्सन्निधावेतान् यातना न प्रबाधते ।
ततो भद्रमुखात्राहं स्थास्ये स्थाणुरिवाचलः ॥१५.५७ ॥

यमपुरुष उवाच

एहि राजन् प्रगच्छामो निजपुण्यसमर्जितान् ।
भुङ्क्ष्व भोगानपास्येह यातनाः पापकर्मणाम् ॥१५.५८ ॥

राजोवाच

तस्मान्न तावद्यास्यामि यावदेते सुदुःखिताः ।
मत्सन्निधानात् सुखिनो भवन्ति नरकौकसः ॥१५.५९ ॥

धिक् तस्य जीवनं पुंसः शरणार्थिनमातुरम् ।
यो नार्तमनुगृह्णाति वैरिपक्षमपि ध्रुवम् ॥१५.६० ॥

यज्ञ-दान-तपांसीह परत्र च न भूतये ।
भवन्ति तस्य यस्यार्त-परित्राणे न मानसम् ॥१५.६१ ॥

नरस्य यस्य कठिनं मनो बालातुरादिषु ।
वृद्धेषु च न तं मन्ये मानुषं राक्षसो हि सः ॥१५.६२ ॥

एतेषां सन्निकर्षात् तु यद्यग्निपरितापजम् ।
तथोग्रगन्धजं वापि दुःखं नरकसम्भवम् ॥१५.६३ ॥

क्षुत्पिपासाभवं दुःखं यच्च मूर्च्छाप्रदं महत् ।
एतेषां त्राणदानन्तु मन्ये स्वर्गसुखात् परम् ॥१५.६४ ॥

प्राप्स्यन्त्यार्ता यदि सुखं बहवो दुःखिते मयि ।
किन्नु प्राप्तं मया न स्यात् तस्मात् त्वं व्रज माचिरम् ॥१५.६५ ॥

यमपुरुष उवाच

एष धर्मश्च शक्रश्च त्वां नेतुं समुपागतौ ।
अवश्यमस्माद् गन्तव्यं तस्मात् पार्थिव ! गम्यताम् ॥१५.६६ ॥

धर्म उवाच

नयामि त्वामहं स्वर्गं त्वया सम्यगुपासितः ।
विमानमेतदारुह्य मा विलम्बस्व गम्यताम् ॥१५.६७॥

राजोवाच

नरके मानवा धर्म पीड्यन्तेऽत्र सहस्रशः ।
त्राहीति चार्ताः क्रन्दन्ति मामतो न व्रजाम्यहम् ॥१५.६८॥

इन्द्र उवाच

कर्मणा नरकप्राप्तिरेतेषां पापकर्मिणाम् ।
स्वर्गस्त्वयापि गन्तव्यो नृप ! पुण्येन कर्मणा ॥१५.६९॥

राजोवाच

यदि जानासि धर्म ! त्वं त्वं वा शक्र ! शचीपते ।
मम यावत् प्रमाणन्तु शुभं तद्वक्तुमर्हथः ॥१५.७०॥

धर्म उवाच

अब्बिन्दवो यथाम्भोधौ यथा वा दिवि तारकाः ।
यथा वा वर्षता धारा गङ्गायां सिकता यथा ॥१५.७१॥

असंख्येया महाराज यथा बिन्द्वादयो ह्यपाम् ।
तथा तवापि पुण्यस्य संख्या नैवोपपद्यते ॥१५.७२ ॥

अनुकम्पामिमामद्य नारकेष्विह कुर्वतः ।
तदेव शतसाहस्त्रं संख्यामुपगतं तव ॥१५.७३ ॥

तद् गच्छ त्वं नृपश्रेष्ठ तद्भोक्तुममरालयम् ।
एतेऽपि पापं नरके क्षपयन्तु स्वकर्मजम् ॥१५.७४ ॥

राजोवाच

कथं स्पृहां करिष्यन्ति मत्सम्पर्केषु मानवाः ।
यदि सत्सन्निधावेषामुकत्कर्षो नोपजायते ॥१५.७५ ॥

तस्माद्यत् सुकृतं किञ्चिन्ममास्ति त्रिदशाधिप ।
तेन मुच्यन्तु नरकात् पापिनो यातनां गताः ॥१५.७६ ॥

इन्द्र उवाच

एवमूर्ध्वतरं स्थानं त्वयावाप्तं महीपते ।
एतांश्च नरकात् पश्य विमुक्तान् पापकारिणः ॥१५.७७ ॥

पुत्र उवाच

ततोऽपतत् पुष्पवृष्टिस्तस्योपरि महीपतेः ।
विमानञ्चाधिरोप्यैनं स्वर्लोकमनयद्धरिः ॥१५.७८॥

अहञ्चान्ये च ये तत्र यातनाभ्यः परिच्युताः ।
स्वकर्मफलनिर्दिष्टं ततो जात्यन्तरं गताः ॥१५.७९॥

एवमेते समाख्याता नरका द्विजसत्तम ।
येन येन च पापेन यां यां योनिमुपैति वै ॥१५.८०॥

तत् तत् सर्वं समाख्यातं यथा दृष्टं मया पुरा ।
पुरानुभवजं ज्ञानमवाप्यावितथं तव ।
अतः परं महाभाग किमन्यत् कथयामि ते ॥१५.८१॥

इति श्रीमार्कण्डेयपुराणे पितापुत्रसंवादो नाम पञ्चदशोऽध्यायः

About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- अनुनाद सिंह

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium